# Trisuparna Suktam

महानारायणोपनिषदान्तर्गतं
शान्तिपाठः ।
ह॒रि॒ः ॐ ॥ शं नो॑ मि॒त्रः शं वरु॑णः । शं नो॑ भवत्वर्य॒मा ।
शं न॒ इन्द्रो॒ बृह॒स्पति॑ः । शं नो॒ विष्णु॑रुरुक्र॒मः ॥

नमो॒ ब्रह्म॑णे । नम॑स्ते वायो । त्वमे॒व प्र॒त्यक्षं॒ ब्रह्मा॑सि ।
त्वामे॒व प्र॒त्यक्षं॒ ब्रह्म॑ वदिष्यामि । ऋ॒तं व॑दिष्यामि ।
स॒त्यं व॑दिष्यामि । तन्माम॑वतु । तद्व॒क्तार॑मवतु ।
अव॑तु॒ माम् । अव॑तु व॒क्तार॓म् ॥
ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

ॐ स॒ह ना॑ववतु । स॒ह नौ॑ भुनक्तु । स॒ह वी॒र्यं॑ करवावहै ।
ते॒ज॒स्वि ना॒वधी॑तमस्तु॒ । मा वि॑द्विषा॒वहै॓ ।
ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

त्रिसुपर्णमन्त्रः १
(महानारायणोपनिषदे अष्टत्रिंशोऽनुवाकः ।)
ब्रह्म॑मेतु॒ माम् । मधु॑मेतु॒ माम् । ब्रह्म॑मे॒व मधु॑मेतु॒ माम् ।
यास्ते॑ सो॑म प्र॒जा व॒त्सोऽभि॒ सो अ॒हम् । दुः॒ष्वप्र॒हन् दु॑रुष्षह ।
यास्ते॑ सोम प्रा॒णाᳪस्ताञ्जु॑होमि ॥ १॥
त्रिसु॑पर्ण॒मया॑चितं ब्राह्म॒णाय॑ दद्यात् । ब्र॒ह्म॒ह॒त्यां वा ए॒ते घ्न॑न्ति ।
ये ब्रा॓ह्म॒णास्त्रिसु॑पर्णं॒ पठ॑न्ति । ते सोमं॒ प्राप्नु॑वन्ति । आ॒
स॒ह॒स्रात् प॒ङ्क्तिं पुन॑न्ति । ॐ ॥ २॥

त्रिसुपर्णमन्त्रः २
(महानारायणोपनिषद् एकोनचत्वारिंशोऽनुवाकः ।)
ब्रह्म॑ मे॒धया॓ । मधु॑ मे॒धया॓ । ब्रह्म॑मे॒व मधु॑ मे॒धया॓ ॥ १॥

अ॒द्यानो॑ देव सवितः प्र॒जाव॑त्सावी॒ः सौभ॑गम् ।
परा॑ दु॒ःष्वप्नि॑यꣳ सुव ॥ २॥

विश्वा॑नि देव सवितर्दुरि॒तानि॒ परा॑सुव । यद्भ॒द्रं तन्म॒ आसु॑व ॥ ३॥

मधु॒वाता॑ ऋताय॒ते मधु॒क्षरन्ति सिन्ध॑वः । माध्वी॑र्नः स॒न्त्वोष॑धीः ॥ ४॥

मधु॒ नक्त॑मु॒तोषसि॒ मधु॑म॒त्पार्थि॑वꣳ रजः॑ । मधु॒द्यौर॑स्तु नः पि॒ता ॥ ५॥

मधु॑मान्नो॒ वन॒स्पति॒र्मधु॑माꣳ अस्तु॒ सूर्यः॑ । माध्वी॒र्गावो॑ भवन्तु नः ॥ ६॥

य इ॒मं त्रिसु॑पर्ण॒मया॑चितं ब्राह्म॒णाय॑ दद्यात् ।
भ्रूण॒ह॒त्यां वा ए॒ते घ्न॑न्ति ।
ये ब्रा॑ह्मणास्त्रिसु॑पर्णं॒ पठ॑न्ति । ते सोम॒ं प्राप्नु॑वन्ति ।
आ॒स॒ह॒स्रा॒त्प॒ङ्क्तिं पुन॑न्ति । ॐ ॥ ७॥

त्रिसुपर्णमन्त्रः ३

(महानारायणोपनिषदे चत्वारिंशोऽनुवाकः ।)
ब्रह्म॑ मे॒धवा॑ । मधु॑ मे॒धवा॑ । ब्रह्म॑मे॒व मधु॑ मे॒धवा॑ ॥ १॥

ब्र॒ह्मा दे॒वाना॑ पद॒वीः क॑वी॒नामृषि॒र्विप्रा॑णां महि॒षो मृ॒गाणा॑म् ।
श्ये॒नो गृद्ध्रा॑णाꣳ स्वधि॑ति॒र्वना॑ना॒ꣳ सोमः॑ प॒वित्र॒मत्ये॑ति॒ रेभ॑न् ॥ २॥
ह॒ꣳसः शु॑चि॒षद्वसु॑रन्तरिक्ष॒सद्धोता॑ वेदि॒षदति॑थिर्दुरोण॒सत् ।
नृ॒षद्व॑र॒सदृ॑त॒सद्व्यो॑म॒सद॒ब्जा गो॒जा ऋ॒त॒जा अ॑द्रि॒जा ऋ॒तं बृ॒हत् ॥ ३॥

ऋ॒चे त्वा॑ ऋ॒चे त्वा॒ समित्स्र॑वन्ति स॒रितो॒ न धेनाः॑ ।
अ॒न्तर्हृ॒दा मन॑सा पू॒यमा॑नाः । घृ॒तस्य॒ धारा॑ अ॒भिचा॑कशीमि ॥ ४॥

हि॒र॒ण्ययों वेत॒सो मध्यं आसाम् । तस्मिँन्त्सुप॒र्णो मधुकृत् कुला॒यी भजंन्नास्ते॒
मधुं दे॒वताँभ्यः । तस्यांसते॒ हंरयः स॒प्त तीरे स्व॒धां
दुहांना अ॒मृतंस्य॒ धारांम् ॥ ५॥

य इ॒दं त्रिसुंपर्ण॒मयांचितं ब्राह्म॒णायं दद्यात् ।
वी॒र॒ह॒त्यां वा ए॒ते घ्नन्ति ।
ये ब्राँह्म॒णास्त्रिसुंपर्णं॒ पठंन्ति । ते सोमं॒ प्राप्नुंवन्ति ।
आ॒स॒हस्रात् प॒ङ्क्तिं पुनंन्ति । ॐ ॥ ६॥

ॐ शं नों मि॒त्रः शं वरुंणः । शं नों भवत्वर्य॒मा । शं
न॒ इन्द्रो॒ बृह॒स्पतिः । शं नो॒ विष्णुंरुरुक्र॒मः ।
नमो॒ ब्रह्मंणे । नमंस्ते वायो । त्वमे॒व प्र॒त्यक्षं॒ ब्रह्मांसि ।
त्वामे॒व प्र॒त्यक्षं॒ ब्रह्मावांदिषम् । ऋ॒तमंवादिषम् ।
स॒त्यमंवादिषम् । तन्मामांवीत् । तद्व॒क्तारंमावीत् । आवी॒न्माम् । आवींद्व॒क्तारँम् ॥

ॐ स॒ह नांववतु । स॒ह नौं भुनक्तु । स॒ह वी॒र्यँं करवावहै ।
ते॒ज॒स्वि ना॒वधीतमस्तु । मा विंद्विषा॒वहैँ ॥

ॐ शान्तिः॒ शान्तिः॒ शान्तिः ॥